# गुरुपूर्णिमा वैशिष्ट्यम्

(Gurupurnima Vaisishtyam)

**Somanchi (Tangirala) Visalakshi**

Vice President, Veda Samskruti Samiti, Hyderabad



गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परब्रह्म तस्मै श्री गुरवे नमः।।

अस्माकं सनातन संप्रदाये आषाढ पूर्णिमा एव गुरु पूर्णिमा इति व्यवह्रियते। वयं सर्वेऽपि गुरुं साक्षाद्दैवमिति मत्वा पूजयामः। वेदमाता अपि - "मातृदेवो भव। पितृदेवो भव।" इत्युक्त्वा तदनन्तर पूजास्थानं गुरवे एव दत्त्वा "आचार्यदेवो भव" इति उक्तवती।

गुरुः नाम ज्ञानमेव। ज्ञानमेव भगवत्स्वरूपम् । "ज्ञानादेव तु कैवल्यम्"। ज्ञानादेव मुक्तिं प्राप्नुयाम। अतः यदार्थज्ञानबोधकः आचार्यः साक्षात् गुरुः। गुरुः, आचार्यः, अध्यापकः, देशिकः इत्यनेक नामभिः गुरुः व्यवह्रियते। तेषां संदर्भोचित व्यवहारः कर्तव्यः। गुरूत्वात् गुरुः भवति। गौरवार्हं जनं गुरुः इति वदन्ति। सर्वेषामपि प्रथमः गुरुः पितरावेव। मातापितरौ एवं आध्यात्मिकज्ञानबोधक आचार्यः च गुरवः इति

पूजनीयाः। या चिच्छक्तिः विश्वे सर्वत्र च अस्मासु अपि च वर्तते, तामेव आत्मा इति वदन्ति। या विद्या आत्मज्ञानं ज्ञातुं प्रेरयति सा एव अध्यात्मविद्या। स एव अत्यन्त आदरणीय गुरुः यः अध्यात्मविद्यां बोधयन्ति। "सा विद्या या विमुक्तये" इति श्रुतिः वदति।

तन्मुक्तिदायक विज्ञानसर्वस्वं अस्मभ्यं भगवान् श्री वेदव्यास महर्षिणा दत्तम्। अतः तस्य महर्षेः जन्मदिनमेव गुरुपूजा दिवसः इति मन्यन्ते। तेषामेव वयं सर्वे गुरुं मत्वा पूजयामहे। साक्षात् श्रीमन्नारायणावतारस्वरूपः भगवान् बादरायणः।

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अफाललोचनश्शम्भुः भगवान् बादरायणः।।
एवं वयं भगवान् बादरायणम् स्तोत्रम् कुर्मः।

व्यासं वशिष्ट नप्तारं शक्तेः पौत्रमकल्मषम्।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्।।

श्रीमद्भागवते श्रीमहाविष्णुः एवं वदति - "स्वस्य अंशः एव 'अपान्तरतमः' इति नाम्ना प्रति कल्पे आविर्भूत्वा वेदानुद्धरिष्यति"।। अपान्तरतमः नाम अपगत अन्तरतमः - यस्य अन्तर्गतं अज्ञानं तमः गतं - यः परिपूर्णज्ञानेन प्रकाशति, स एव अपान्तरतमः। पराशरमहर्षेः सत्यवती देव्यां सद्योजात, सद्योयौवनं प्राप्तः पुत्रः कृष्णवर्णः, अतः तस्य नाम कृष्णः। सः द्वीपे जातः वा कृष्णद्वीपे जातः अतः श्रीकृष्णद्वैपायनः इति नामवानभवत्। पराशरस्य पुत्रः। अतः पाराशर्यः। सत्यवत्याः पुत्रः। अतः सात्यवतेयः। बदरीवने तपः कृतः। तत् कारणात् बादरायणः इति प्रसिद्धः अभवत्।

द्वापर युगान्ते सर्ववेदराशिः एकीभूतः। कलियुगे नराः मन्दबुद्धयः भवन्ति। सर्वान् वेदान् पठितुं न शक्नुवन्ति इति मत्वा सः वेदान् चतुर्था विभज्य एकां व्यवस्थां स्थापितवान्। वेदानां व्यासं कृतवान् अतः 'वेदव्यासः' इति ख्यातोऽभवत्।

वेदव्यासमहर्षिः चतुर्वेदान्, एकैकं वेदम् स्व चतुर्मुख्य शिष्येभ्यो - पैलवैशम्पायनजैमिनि सुमन्तेभ्यो उपदिश्य, वेदानां पारंपर्यरक्षणाय व्यवस्थां कृतवान्। अतः सः सर्वेभ्यो मानवेभ्यो गुरुरभवत्।

वेदसारः सामान्यजनैरपि प्राप्तव्यमिति मत्वा अत्यन्त मनोहरतया अष्टादश पुराणान् लिखितवान्। पुराणेषु संपूर्णवेदविज्ञानम् दृश्यते। भारतीय संस्कृतिसंप्रदायाः दृश्यन्ते।

भक्ति वैशिष्ट्यम् च भागवतानां माहात्म्यं च उद्घोषणाय भक्तिशास्त्रग्रन्थं श्रीमद्भागवतम् रचितवान्।

सर्वविधधर्मांश्च नीतिं च बोधितुं वेदोपबृंहणम् श्रीमहाभारतम् लक्षश्लोकयुतं रचितवान्। महाभारतम् "यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्" इति प्रसिद्धः।

महाभारतांतर्वर्तितोपाख्यानानामाधारेण शतशः सहस्रशः काव्यनाटकादयः उत्पन्नाः।

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्र नेत्र।
येन त्वया भारत तैल पूर्णः

प्रज्वालितो ज्ञानमयप्रदीपः।।

महाभारतांतर्गता श्रीमद्भगवद्गीता। केवलं भगवद्गीता एव सर्ववेदसारमिति वक्तुं शक्यते।

मुमुक्षूणां ज्ञानप्रदानाय सर्वोपनिषदः सारं सूत्ररूपेण "ब्रह्मसूत्राणि" रचितवान्। ब्रह्मसूत्रान् विशदयितुम् विविध वेदान्तिनः स्वमतानुसारं भाष्यान् लिखित्वा द्वैत, अद्वैत, विशिष्टाद्वैतादि सिद्धान्तान् स्थापितवन्तः ।

व्यासोच्छिष्टं जगत्सर्वं"। यावद्विज्ञानं व्यासेनैव दत्तम्। अत एव व्यासभगवानेव अस्माकं गुरूः, यतः सर्वं ज्ञानं प्रसूतम्। तस्य जन्मतिथिः आषाढ पूर्णिमा। अतः तस्य जन्मतिथौ तमेव गुरुं मत्वा तस्य षोडशोपचार पूजा कर्तव्या। सांबसदाशिवादारभ्य गुरुपरंपरा स्मर्तव्या। व्यासमहर्षिं आराध्य आर्घ्यप्रदानं कृत्वा आशिषाः प्राप्तव्यमिति विज्ञापये। पश्चात् जगद्गुरुम् श्री आदिशंकर भगवत्पादानामाराधनं करणीयम्। अस्माकं लौकिक गुरवः, ये व्यासेन उपदिष्टज्ञानं बोधयन्ति, तेषामपि पूजा करणीया।

सदाशिव समारंभां व्यासशंकर मध्यमां।
अस्मदाचार्य पर्यन्ताम् वन्दे गुरु परंपराम्।।

- स्वस्ति -